वारण्डी, स्त्री, ( वारण्ड + गौरादित्वात् ङीष् । ) द्वारपिण्डी । इति मेदिनी । ते, ३३ ॥

वारेन्द्री, स्त्री, देशविशेषः । इति शब्दरत्नावली ॥ यथा,—

"प्राच्यां मागधशोणौ च वारेन्द्रीगौड़राढ़काः ।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयादयः ॥"
इति ज्योतिस्तत्त्वम् ॥

अधुना राजशाहीनामकदेशैकदेशः ॥

वार्क्षं, क्ली, ( वृक्षाणां समूह इति । वृक्ष + "तस्य समूहः ।" ४ । २ । ३७ । इति अण् । ) वनम् । इति हेमचन्द्रः ॥ ( वृक्षस्येदमित्यण् । ) वृक्षसम्बन्धिनि, त्रि । यथा,—

"वार्क्षं वित्तप्रदं लिङ्गं स्फाटिकं सर्व्वकामदम् ॥"
इति तिथ्यादितत्त्वम् ॥

वार्क्षी, स्त्री, ( वृक्षस्यापत्यं स्त्री । वृक्ष + अण् । ङीप् । ) स्त्रीविशेषः । ( यथा, महाभारते । १ । १९७ । १५ ।

"तथैव मुनिना वार्क्षी तपोभिर्भावितात्मनः ।
सङ्गताभूद्दश भ्रातॄनेकनाम्नः प्रचेतसः ॥"

इयं हि मारिषापरनाम्नी कण्डुमुनेरौरसात् प्रम्लोचागर्भगता सती पश्चात् वृक्षेभ्य उत्पन्ना । तत्कथा यथा, विष्णुपुराणे ।१।१५।१—५३ ।

पराशर उवाच ।

"तपश्चरत्सु पृथिवीं प्रचेतःसु महीरुहाः ।
अरक्ष्यमाणामावव्रुर्बभूवाथ प्रजाक्षयः ॥
नाशकन्मारुतो वातुं वृतं खमभवद्द्रुमैः ।
दशवर्षसहस्राणि न शेकुश्चेष्टितुं प्रजाः ॥
तद्दृष्ट्वा जलनिष्क्रान्ताः सर्व्वे क्रुद्धाः प्रचेतसः ।
मुखेभ्यो वायुमग्निञ्च तेऽसृजन् जातमन्यवः ॥
उन्मूलानथ तान् वृक्षान् कृत्वा वायुरशोषयत् ॥
तानग्निरदहद्घोरस्तत्राभूद्द्रुमसंक्षयः ॥
द्रुमक्षयमथो दृष्ट्वा किञ्चिच्छिष्टेषु शाखिषु ।
उपगम्याब्रवीदेतान् राजा सोमः प्रजापतीन् ॥
कोपं यच्छत राजानः शृणुध्वञ्च वचो मम ।
सन्धानं वः करिष्यामि सह क्षितिरुहैरहम् ॥
रत्नभूता च कन्येयं वार्क्षेयी वरवर्णिनी ।
भविष्यं जानता पूर्व्वं मया गोभिर्व्विवर्द्धिता ॥
मारिषा नाम नाम्नैषा वृक्षाणामिति निर्म्मिता ।
भार्य्या वोऽस्तु महाभागा ध्रुवं वंशविवर्द्धिनी ॥
युष्माकं तेजसोऽर्द्धेन मम चार्द्धेन तेजसः ।
अस्यामुत्पत्स्यते विद्वान् दक्षो नाम प्रजापतिः ॥
मम चांशेन संयुक्तो युष्मत्तेजोमयेन वै ।
अग्निनाग्निसमो भूयः प्रजाः संवर्द्धयिष्यति ॥
कण्डुर्नाम मुनिः पूर्व्वमासीद्वेदविदां वरः ।
सुरम्ये गोमतीतीरे स तेपे परमं तपः ॥
तत्क्षोभाय सुरेन्द्रेण प्रम्लोचाख्या वराप्सराः ।
प्रयुक्ता क्षोभयामास तमृषिं सा शुचिस्मिता ॥
क्षोभितः स तया सार्द्धं वर्षाणामधिकं शतम् ।
अतिष्ठन्मन्दरद्रोण्यां विषयासक्तमानसः ॥
सा तं प्राह महात्मानं गन्तुमिच्छाम्यहं दिवम् ।
प्रसादसुमुखो ब्रह्मन् अनुज्ञां दातुमर्हसि ॥
तयैवमुक्तः स मुनिस्तस्यामासक्तमानसः ।
दिनानि कतिचिद्भद्रे स्थीयतामित्यभाषत ॥
एवमुक्ता ततस्तेन सार्द्धं वर्षशतं पुनः ।
बुभुजे विषयांस्तन्वी तेन सार्द्धं महात्मना ॥
अनुज्ञां देहि भगवन् व्रजामि त्रिदिवालयम् ।
उक्तस्तथेति स मुनिः स्थीयतामित्यभाषत ॥
पुनर्गते वर्षशते साधिके सा शुभानना ।
यामीत्याह दिवं ब्रह्मन् प्रणयस्मितशोभनम् ॥
उक्तस्तथैवं स मुनिरुपगुह्यायतेक्षणाम् ।
प्राहास्यतां क्षणं सुभ्रु चिरं कालं गमिष्यसि ॥
तच्छापभीता सुश्रोणी सह तेनर्षिणा पुनः ।
शतद्वयं किञ्चिदूनं वर्षाणामन्वतिष्ठत ॥
गमनाय महाभागो देवराजनिवेशनम् ।
प्रोक्तः प्रोक्तस्तया तन्व्या स्थीयतामित्यभाषत ॥
तं सा शापभयाद्भीता दाक्षिण्येन च दक्षिणा ।
प्रोक्ता प्रणयभङ्गार्त्तिवेदनी न जहौ मुनिम् ॥
तया च रमतस्तस्य महर्षेस्तदहर्निशम् ।
नवं नवमभूत् प्रेम मन्मथाविष्टचेतसः ॥
एकदा तु त्वरायुक्तो निश्चक्रामोटजान्मुनिः ।
निष्क्रामन्तञ्च कुत्रेति गम्यते प्राह सा शुभा ॥
इत्युक्तः स तया प्राह परिवृत्तमहः शुभे ।
सन्ध्योपास्तिं करिष्यामि क्रियालोपोऽन्यथा भवेत ॥
ततः प्रहस्य सुदिता तं सा प्राह महामुनिम् ।
किमद्य सर्व्वधर्म्मज्ञ परिवृत्तमहस्तव ॥
बहूनां विप्र वर्षाणां परिणाममहस्तव ।
गतमेतन्न कुरुते विस्मयं कस्य कथ्यताम् ॥

मुनिरुवाच ।

प्रातस्त्वमागता भद्रे नदीतीरमिदं शुभम् ।
मया दृष्टासि तन्वङ्गि प्रविष्टा च ममाश्रमम् ॥
इयञ्च वर्त्तते सन्ध्या परिणाममहर्गतम् ।
उपहासः किमर्थोऽयं सद्भावः कथ्यतां मम ॥

प्रम्लोचोवाच ।

प्रत्यूषस्यागता ब्रह्मन् सत्यमेतन्न ते मृषा ।
किन्त्वद्य तस्य कालस्य गतान्यब्दशतानि ते ॥

सोम उवाच ।

ततः ससाध्वसो विप्रस्तां पप्रच्छायतेक्षणाम् ।
कथ्यतां भीरु कः कालस्त्वया मे रमतः सह ॥

प्रम्लोचोवाच ।

सप्तोत्तराण्यतीतानि नववर्षशतानि ते ।
मासाश्च षट् तथैवान्यत् समतीतं दिनत्रयम् ॥

ऋषिरुवाच ।

सत्यं भीरु वदस्येतत् परिहासोऽथ वा शुभे ।
दिनमेकमहं मन्ये त्वया सार्द्धमिहासितम् ॥

प्रम्लोचोवाच ।

वदिष्याम्यनृतं ब्रह्मन् कथमत्र तवान्तिके ।
विशेषेणाद्य भवता पृष्टा मार्गानुवर्त्तिना ॥

सोम उवाच ।

निशम्य तद्वचः सत्यं स मुनिर्नृपनन्दनाः ।
धिङ्मां धिङ्मामतीवेत्थं निनिन्दात्मानमात्मना ॥

मुनिरुवाच ।

तपांसि मम नष्टानि हतं ब्रह्मविदां धनम् ।
हृतो विवेकः केनापि योषिन्मोहाय निर्म्मिता ॥
ऊर्म्मिषट्कातिगं ब्रह्म ज्ञेयमात्मजयेन मे ।
मतिरेषा हृता येन धिक् तं काममहाग्रहम् ॥
व्रतानि वेदविद्याप्तिकारणान्यखिलानि च ।
नरकग्राममार्गेण सङ्गेनापहृतानि मे ॥
विनिन्द्येत्थं स धर्म्मज्ञः स्वयमात्मानमात्मना ।
तामप्सरसमासीनामिदं वचनमब्रवीत् ॥
गच्छ पापे यथाकामं यत् कार्य्यं तत्कृतं त्वया ।
देवराजस्य मत्क्षोभं कुर्व्वन्त्या भावचेष्टितैः ॥
न त्वां करोम्यहं भस्म क्रोधतीव्रेण वह्निना ।
सतां साप्तपदं मैत्रमुषितोऽहं त्वया सह ॥
अथवा तव को दोषः किं वा कुप्याम्यहं तव ।
ममैव दोषो नितरां येनाहमजितेन्द्रियः ॥
यया शक्रप्रियार्थिन्या कृतो मे तपसो व्ययः ।
त्वया धिक् तां महामोहमञ्जूषां सुजुगुप्सिताम् ॥

सोम उवाच ।

यावदित्थं स विप्रर्षिस्तां ब्रवीति सुमध्यमाम् ।
तावद्गलत्स्वेदजला सा बभूवातिवेपथुः ॥
प्रवेपमानां सततं खिन्नगात्रलतां सतीम् ।
गच्छ गच्छेति सक्रोधं उवाच मुनिसत्तमः ॥
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात् ।
आकाशगामिनी स्वेदं ममार्ज्ज तरुपल्लवैः ॥
वृक्षाद्वृक्षं ययौ बाला तदग्रारुणपल्लवैः ।
निर्म्मार्ज्जमाना गात्राणि गलत्स्वेदजलानि वै ॥
ऋषिणा यस्तदा गर्भस्तस्या देहे समाहितः ।
निर्ज्जगाम स रोमाञ्चस्वेदरूपी तदङ्गतः ॥
तं वृक्षा जगृहुर्गर्भमेकं चक्रे तु मारुतः ।
मया चाप्यायितो गोभिः स तदा ववृधे शनैः ॥
वृक्षाग्रगर्भसंभूता मारिषाख्या वरानना ।
तां प्रदास्यन्ति वो वृक्षाः कोप एष प्रशाम्यताम् ॥
कण्डोरपत्यमेवं सा वृक्षेभ्यश्च समुद्गता ।
ममापत्यं तथा वायोः प्रम्लोचा तनया च सा ॥
स चापि भगवान् कण्डुः क्षीणे तपसि सत्तमः ।
पुरुषोत्तमाख्यं मैत्रेय विष्णोरायतनं ययौ ॥
तत्रैकाग्रमतिर्भूत्वा चकाराराधनं हरेः ।
ब्रह्मपारमयं कुर्व्वन् जपमेकाग्रमानसः ।
ऊर्द्ध्वबाहुर्महायोगी स्थित्वासौ भूपनन्दनाः ॥")

वार्च्चः, पुं, हंसः । वारि चरतीत्यर्थे डप्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

वार्णिकः, त्रि, ( वर्णलेखनं शिल्पमस्य । वर्ण + ठञ् । ) लेखकः । इति शब्दमाला ॥

वार्त्तं, क्ली, असारम् । आरोग्यम् । इत्यमरः । ३ । ३ । ७५ ॥

वार्त्तः, त्रि, ( वृत्तिरस्यस्येति । "प्रज्ञाश्रद्धार्च्चा-वृत्तिभ्यो णः ।" ५ । २ । १०१ । इति णः । ) निरामयः । इत्यमरः । २ । ६ । ५७ ॥ वृत्तिशाली । इत्यजयपालः ॥

वार्त्तकः, पुं, पक्षिविशेषः । वटेर इति भाषा । यथा,—